SEAL

# 4622

Series : **A**

# SANSKRIT LITERATURE PRACHYA

| प्रश्न–पुस्तिका क्रम संख्या<br>Question Booklet Sl. No. |
|---|
| 1450861 |

अनुक्रमांक
Roll No.

परीक्षार्थी अपना अनुक्रमांक दिए गए खानों में लिखें।
Candidate should write Roll No. in the given boxes.

मुद्रित पृष्ठों की संख्या/No. of Printed Pages : **24**

कुल प्रश्नों की संख्या/Total No. of Questions : **150**

समय/Time : **3 घण्टे/Hours**

पूर्णांक/Total Marks : **600**

## परीक्षार्थियों के लिए निर्देश

1. परीक्षा प्रारम्भ होने के तुरन्त बाद, आप इस प्रश्न–पुस्तिका की पड़ताल अवश्य कर लें, कि इसमें कोई बिना छपा, फटा या छूटा हुआ पृष्ठ अथवा प्रश्नांश, आदि **न** हो। यदि ऐसा है, तो वीक्षक से तत्काल संपर्क कर प्रश्न–पुस्तिका बदल लेवें।
2. इस प्रश्न–पुस्तिका में **संस्कृत साहित्य प्राच्य** से संबंधित कुल **150** प्रश्न हैं। **सभी** प्रश्न अनिवार्य हैं।
3. प्रदत्त उत्तर–पत्र (ओ.एम.आर. शीट) पर दिए गए निर्देशों को ध्यानपूर्वक पढ़ें तथा अपने उत्तर तदनुसार अंकित करें।
4. कृपया उत्तर–पत्र (ओ.एम.आर. शीट) पर निर्धारित स्थानों पर आवश्यक प्रविष्टियाँ करें, अन्यत्र स्थानों पर नहीं।
5. परीक्षार्थी सभी रफ़ कार्य प्रश्न–पुस्तिका के अंतिम पृष्ठों पर निर्धारित स्थान पर ही करें, अन्यत्र कहीं नहीं तथा उत्तर–पत्र (ओ.एम.आर. शीट) पर भी नहीं।

## INSTRUCTIONS TO THE CANDIDATES

1. Immediately after the commencement of the examination, you should check that this Question Booklet ***does not*** have any unprinted or torn or missing pages or items etc. If so, immediately contact the Invigilator and get it replaced with another Question Booklet.
2. This Question Booklet contains Total **150** questions of concerned **Sanskrit Literature Prachya** subject. **All** questions are compulsory.
3. Read carefully the instructions given on the Answer Sheet (OMR) supplied and indicate your answers accordingly.
4. Kindly make necessary entries on the Answer Sheet (OMR) at the places indicated and nowhere else.
5. Examinee should do all rough work on the space meant for rough work on pages given at the end of the Question Booklet and nowhere else, not even on the Answer Sheet (OMR).



SEAL

## द्वितीय प्रश्न–पत्र
## संस्कृत साहित्य प्राच्य

1. 'धोरणी' इत्यस्य कोऽर्थः ?
   (A) गोयात्रा
   (B) उष्ट्रयात्रा
   (C) गजयात्रा
   (D) अश्वयात्रा

2. गुरुमतं स्वमतं प्रथितं सदा,
   गुरु सुपूजनमेव सतां मतम् ।
   गुरुपदं सतनामिजनप्रियं
   जयति सद्गुरुवादमतं नृषु ।।
   अयं श्लोकः कुत्र वर्तते ?
   (A) गुरुवचनामृतमहाकाव्ये
   (B) गुरुघासिदासमहाकाव्ये
   (C) गुरुलहर्याम
   (D) गुरुगौरवनाटके

3. आचार्य अभिराजराजेन्द्र मिश्रविरचितं 'भारतदण्डकम्' कस्य ग्रन्थस्य अंशविशेषः ?
   (A) श्रुतिम्भराग्रन्थस्य
   (B) 'कस्मै देवाय हविषा विधेम्' इत्यस्य
   (C) अभिराजसप्तशतीग्रन्थस्य
   (D) अभिराजयशोभूषणग्रन्थस्य

4. 'पापपुण्यविधुरा धरणीयं कर्मफलं भवता दरणीयम् ।' इति वर्णनं कुत्र वर्तते ?
   (A) स्वातन्त्र्यसम्भवे
   (B) साकेतसौरभे
   (C) तदेव गगनं सैव धरायाम्
   (D) धरणीवैभवे

5. आचार्यराधावल्लभत्रिपाठिनः मते अनुकीर्तनं कतिविधम् ?
   (A) द्विविधम्
   (B) त्रिविधम्
   (C) चतुर्विधम्
   (D) पञ्चविधम्

6. "शब्दार्थौ यत्र गुणी भावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्" इत्यत्र 'कमपि' पदेन कस्य निरासः ?
   (A) सालङ्कारकाव्यस्य निरासः
   (B) शब्दालङ्कारप्रधानकाव्यस्य निरासः
   (C) अतिगूढस्फुटव्यङ्ग्ययोर्निरासः
   (D) ध्वन्यप्रधानकाव्यस्य निरासः

7. अधोलिखितमुदाहरणं कीदृशः काव्यस्य अस्ति ?
राघवविरहज्वाला-सन्तापितसह्यशैलशिखरेषु ।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ।।

(A) अधमकाव्यस्य

(B) उत्तमकाव्यस्य

(C) शब्दचित्रकाव्यस्य

(D) अर्थचित्रकाव्यस्य

8. मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत
कृष्णसारः ।। इति श्लोके वर्तते

(A) रसः

(B) रसाभासः

(C) भावः

(D) भावाभासः

9. अधोलिखितेषु असत्यं वाक्यं चिनुत ।

(A) रीतयोऽवयवसंस्थानविशेषवत्

(B) गुणाः शौर्यादिवत्

(C) अलङ्काराः वस्त्रादिवत्

(D) उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः

10. अर्थान्तर संक्रमितवाच्यः कस्य भेदः ?

(A) अविवक्षितवाच्यध्वनेः

(B) गुणीभूतव्यङ्ग्यस्य

(C) विवक्षितान्यपरवाच्यध्वनेः

(D) चित्रकाव्यस्य

11. चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्या ग्राह्ये नटे अस्य मतस्य समर्थकः

(A) भरतः

(B) अभिनवगुप्तः

(C) शंकुकः

(D) भट्टनायकः

12. जुगुप्सा स्थायिभावः वर्तते

(A) वीर रसस्य

(B) अद्भुत रसस्य

(C) करुण रसस्य

(D) बीभत्स रसस्य

13. अभिव्यक्तिवादस्य प्रवर्तकः आचार्यः

(A) भरतः

(B) शंकुकः

(C) भट्टनायकः

(D) अभिनवगुप्तः

14. रसानुभूतेः प्रतिपादने उत्पत्तिवादः सम्बद्धोऽस्ति

(A) उत्तर मीमांसया

(B) न्यायेन

(C) आलकारिके

(D) सांख्येन

**15.** आचार्य भरतानुसारेण नाट्ये रसाः सन्ति

(A) पञ्च

(B) अष्ट

(C) सप्त

(D) षष्ठ

**16.** अर्थप्रकृतीषु नास्ति

(A) पताका

(B) प्रकरी

(C) फलागमः

(D) कार्यम्

**17.** गर्भसन्धिविषये समीचीनमस्ति

(A) बीजम् + प्रारम्भः

(B) पताका + प्राप्त्याशा

(C) प्रकरी + नियताप्तिः

(D) बिन्दुः + प्रयत्नः

**18.** 'लक्ष्यालक्ष्यतयोद्भेदस्तस्य ________ भवेत्' अत्र रिक्तस्थानपूर्त्यर्थम् उचितम् पदमस्ति ।

(A) मुखम्

(B) प्रतिमुखम्

(C) सावमर्शम्

(D) उपसंहृतिः

**19.** विश्वनाथानुसारं शृंगारिरूपत्वे नायकाः कतिविधा भवन्ति ?

(A) 4

(B) 8

(C) 12

(D) 16

**20.** नानाकार्यवशाद् यस्याः दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्ता भवेत् ............ ।।
अत्र रिक्तपादपूर्त्यर्थम् समुचितमस्ति

(A) विरहोत्कण्ठिता

(B) प्रोषितभर्तृका

(C) कलहान्तरिता तु सा

(D) विप्रलब्धा तु सा

**21.** अभिधायाः पुच्छभूता का ?

(A) अभिधामूला व्यञ्जना

(B) तात्पर्यवृत्तिः

(C) लक्षणा

(D) आर्थीव्यञ्जना

22. 'साक्षात्संकेतितं योऽर्थमभिधत्ते सः कः ?

(A) वाच्यः

(B) वाचकः

(C) व्यङ्ग्यः

(D) लक्ष्यः

23. आकाङ्क्षा-योग्यता-सन्निधियुक्तात् यः तात्पर्यार्थः फलति सः

(A) वाक्यम्

(B) शब्दः

(C) काव्यम्

(D) वाक्यार्थः

24. द्विविधे वस्तुधर्मे साध्यो नाम कः ?

(A) पदार्थस्य प्राणप्रदः

(B) पूर्वापरीभूतावयवः क्रियारूपः

(C) विशेषाधानहेतुः

(D) जातिविशिष्टः

25. परमाण्वादीनां कथं पारिभाषिकं गुणत्वम् ?

(A) गुणमध्यपाठात्

(B) व्याकरणशास्त्रे परिभाषाप्रकरणे पाठात्

(C) अप्रधानत्वात्

(D) मीमांसाशास्त्रे तथाङ्गीकारात्

26. काव्यालङ्कारसूत्रग्रन्थस्य कामधेनुटीकायाः कर्त्ता कः ?

(A) भोजराजः

(B) गोपेन्द्रत्रिपुरहर भूपालः

(C) शार्ङ्गधरः

(D) प्रतापरूद्रः

27. पदरचनायां वैशिष्ट्याधायको विशेषः कीदृशः ?

(A) अलङ्कारात्मा

(B) रसात्मा

(C) औचित्यात्मा

(D) गुणात्मा

28. विपञ्चीस्वर सौभाग्या का रीतिः ?

(A) गौडी

(B) पाञ्चाली

(C) वैदर्भी

(D) मागधी

29. तिसृषु रीतिषु काव्यं कथं प्रतिष्ठितं भवति ?

(A) फलेषु बीजमिव

(B) रेखासु चित्रमिव

(C) पुष्पेषु सौगन्ध्यमिव

(D) तिलेषु तैलमिव

30. रीतिषु वैदर्भी कस्माद् ग्राह्या ?

(A) गुणसाकल्यात्

(B) व्यक्तरसत्वात्

(C) सारल्यात्

(D) क्लिष्टत्वात्

31. "शब्दगत चारुत्त्व हेतवः" __________

(A) अनुप्रासादयः

(B) उपमादयः

(C) रूपकादयः

(D) विशेषोक्त्यादयः

32. ध्वन्यालोकस्य मंगलाचरणे कः अलंकारः वर्तते ?

(A) व्यतिरेकः

(B) सन्देहः

(C) दृष्टान्तः

(D) श्लेषः

33. अर्थगतचारुत्त्व हेतवः __________

(A) यमकादयः

(B) अनुप्रासादयः

(C) उपमादयः

(D) श्लेषादयः

34. आनन्दवर्धनस्य समकालीनः मनोरथः कविः केन सम्बन्धितः ?

(A) अनिर्वचनीयतावादेन

(B) भाक्तवादेन

(C) अभाववादेन

(D) कोऽपि न

35. समाम्नातपूर्वस्य तात्पर्यम् कः ?

(A) स्फोटः

(B) सम्यकः

(C) सहृदयः

(D) पुनः पुनः प्रकाशितः

36. रस सम्प्रदायस्य प्रवर्तकः आचार्यः

(A) भरतः

(B) अभिनवगुप्तः

(C) आनन्दवर्धनः

(D) कुन्तकः

37. रसभावतदाभासादयः किं कारणेन रसवदलंकारेभ्यः भिन्नाः भवन्ति ?

(A) अलंकारेण

(B) अलंकार्येण

(C) धर्मेण

(D) कर्मेण

**38.** अनुभावः रसानुभूतेः कारणं वर्तते

(A) लोककारणम्

(B) काव्यकारणम्

(C) वाह्यकारणम्

(D) आभ्यन्तरकारणम्

**39.** रससूत्रस्य व्याख्याकारेषु उत्पत्तिवादस्य प्रवर्तकः

(A) भट्टलोल्लटः

(B) शंकुकः

(C) भट्टनायकः

(D) अभिनवगुप्तः

**40.** भोजकत्त्व व्यापारस्य कल्पनायाः कर्तारः

(A) अभिनवगुप्तः

(B) भट्टनायकः

(C) भट्टलोल्लटः

(D) शंकुकः

**41.** रौद्ररसौचित्यस्य इदमुदाहरणम्

(A) व्यूढोरस्को वृषस्कन्धः

(B) अमरी कबरीभारेत्यादि

(C) यो यः शस्त्रं बिभर्ति

(D) तीर्त्वा भूतेशमौलिस्रजम्

**42.** किं सततं संमतं सताम् ?

(A) अनौचित्यं वाक्यम्

(B) गुणालङ्कारभूषितम् काव्यम्

(C) औचित्यरचितं वाक्यम्

(D) वक्रोक्तिविभूषितं वाक्यम्

**43.** नाले शौर्यमहोत्पलरयेत्यादि श्लोकः कस्योदाहरणम् ?

(A) वाक्यगतानौचित्यस्य

(B) पदगतानौचित्यस्य

(C) प्रबन्धगतानौचित्यस्य

(D) वाक्यगतौचित्यस्य

**44.** परिम्लानं पीनस्तनजघनेत्यादि श्लोके केन पदेन औचित्यं भासते ?

(A) परिम्लानम्

(B) बिसिनी पत्रशयनम्

(C) कृशाङ्गनाः

(D) सन्तापम्

**45.** क्षेमेन्द्रमते काव्यजीवितं किम् ?

(A) अलङ्कारः

(B) गुणः

(C) रसः

(D) औचित्यम्

46. ध्वनि सिद्धान्तस्य ध्वनिप्रस्थापनपरमाचार्यः कः अस्ति ?

(A) आचार्य वामनः

(B) आचार्य उद्भटः

(C) आचार्य मम्मटः

(D) आचार्य रुद्रटः

47. ध्वनि सिद्धान्तस्य विशेषरूपेण केन खण्डनं कृतम् ?

(A) अभिनवगुप्तेन

(B) पण्डितराजश्रीजगन्नाथेन

(C) भट्टनायकेन

(D) महिमभट्टेन

48. ''तमर्थमुपसर्जनीकृतस्वार्थौः'' वाक्ये स्वार्थस्य उपसर्जनीकृतं किं तात्पर्यम्

(A) परार्थं गुणीभूतं कृत्वा

(B) स्वार्थं गुणीभूतं कृत्वा

(C) काव्यस्य कृत्वा

(D) अर्थस्य कृत्वा

49. असंलक्ष्यक्रमव्यङ्ग्यध्वनिः भेदः कस्य अस्ति ?

(A) अर्थान्तरसंक्रमितस्य

(B) अत्यन्ततिरस्कृतस्य

(C) अविवक्षितवाच्यस्य

(D) विवक्षितवाच्यस्य

50. ''काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनक्स्पृष्टोऽपि न लक्षितः'' ध्वनि विरोधीषु कस्य मतम्'' ?

(A) अभाववादिनाम्

(B) भाक्तवादिनाम्

(C) अनिर्वचनियतावादिनाम्

(D) ध्वनिवादिनाम्

51. संस्कृतं प्राकृतं चान्यदपभ्रंश इति त्रिधा इतीयं पङ्क्तिः कस्य काव्यलक्षणे प्रयुक्ता ?

(A) मम्मटस्य

(B) वामनस्य

(C) भामहस्य

(D) विश्वनाथस्य

52. सोच्छ्वासा का मता ?

(A) कथा

(B) आख्यायिका

(C) द्विपदी

(D) शम्या

53. अनलङ्कृती इत्यस्मिन् पदे नञ् कस्मिन् अर्थे वर्तते ?

(A) ईषदर्थे

(B) सादृश्यार्थे

(C) अभावार्थे

(D) अप्राशस्त्यार्थे

54. कां विना प्रसृतं काव्यम् उपहसनीयं स्यात् ?

(A) बुद्धिम्

(B) शक्तिम्

(C) निपुणताम्

(D) शिक्षाम्

55. इति ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।।
इत्यत्र कस्य चमत्कारित्वम् ?

(A) ध्वनेरेव

(B) लक्ष्यार्थस्यैव

(C) व्यङ्ग्यस्यैव

(D) वाच्यस्यैव

56. परमौचित्यकारिणे कस्मै नमः ?

(A) शिवाय

(B) ब्रह्मणे

(C) अच्युताय

(D) गणेशाय

57. क्षेमेन्द्रस्य कृती स्तः

1. कविविलासः
2. कविकौस्तुभः
3. कविकण्ठाभरणम्
4. कविकाव्यालापः

समीचीनमुत्तरं चिनुत ।

(A) 1, 2

(B) 2, 3

(C) 1, 3

(D) 2, 4

58. प्रबन्धार्थगतौचित्यस्य उदाहरणम् अस्ति

(A) जातं वंशे भुवनविदिते ...... ।

(B) यः कौमारहरः स एव हि वरः ....... ।

(C) आमेखलं सञ्चरताम् ........ ।

(D) कान्तायकल्याणगुणैकधाम्ने ...... ।

59. बालेन्दुवक्राण्यविकासेत्यादिपद्ये कीदृशमौचित्यम् ?

(A) गुणौचित्यम्

(B) भावौचित्यम्

(C) अलङ्कारौचित्यम्

(D) रसौचित्यम्

60. सीधुस्पर्शभयान्नेति श्लोके कस्य रसस्यौचित्यं वर्तते ?

(A) करुण रसस्य

(B) अद्भुतरसस्य

(C) वीररसस्य

(D) हास्यरसस्य

61. वाच्यभेदेन भिन्ना अपि शब्दाः भिन्नं स्वरूपमपह्नुवते

(A) अप्रस्तुतप्रशंसालङ्कारे

(B) श्लेषालङ्कारे

(C) वक्रोक्त्यलङ्कारे

(D) विशेषोक्त्यलङ्कारे

62. भरतमुनिना नाट्यशास्त्रे स्वीकृता अलङ्कारा: सन्ति

i. रूपकम्

ii. दीपकम्

iii. अधिकम्

iv. यमकम्

(A) i, ii, iii

(B) i, iii, iv

(C) i, ii, iv

(D) ii, iii, iv

63. 'सौन्दर्यमलङ्कार:' इति कस्यास्ति वचनम्

(A) वामनाचार्यस्य काव्यालङ्कारसूत्रवृत्तौ

(B) रुद्रटाचार्यस्य काव्यालङ्कारसारसङ्ग्रहे

(C) मम्मटाचार्यस्य काव्यालङ्कारवृत्तौ

(D) वामनाचार्यस्य काव्यालङ्कारकारिकायाम्

64. अनुप्रासालङ्कारे वर्णसाम्यं भवति

(A) स्वरवैसादृश्येऽपि स्वरसदृशत्वम्

(B) स्वरवैसादृश्येऽपि पदसदृशत्वम्

(C) स्वरवैसादृश्येपि व्यञ्जनसदृशत्वम्

(D) स्वरसादृश्येऽपि व्यञ्जनासदृशत्वम्

65. अधोलिखितेषु साहित्यशास्त्रस्याचार्येषु अलङ्कारप्रस्थानस्याचार्या: सन्ति

i. भामह:

ii. उद्भट:

iii. क्षेमेन्द्र:

iv. रुद्रट:

(A) i, ii, iii

(B) ii, iii, iv

(C) i, ii, iv

(D) i, iii, iv

66. माधुर्यं कारणं भवति

(A) दीप्ते:

(B) द्रुते:

(C) विकासस्य

(D) शृङ्गारस्य

67. क: साधारण: गुण: चित्रं व्याप्नोति ?

(A) प्रसाद:

(B) समाधि:

(C) माधुर्यम्

(D) ओज:

68. 'कार्तार्थ्यम्' इति पदं विद्यते

(A) अवाचकम्

(B) श्रुतिकटु

(C) ग्राम्यम्

(D) निरर्थकम्

69. 'विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम्' इति उदाहरणं वर्तते

(A) दुष्क्रमत्वस्य

(B) व्याहतत्वस्य

(C) संदिग्धत्वस्य

(D) प्रसिद्धिविरुद्धत्वस्य

70. 'अयं स रसनोत्कर्षी' अत्र शृङ्गारः वर्तते

(A) साम्येन विवक्षितः

(B) अङ्गिनि अङ्गत्वं प्राप्तः

(C) स्मर्यमाणः

(D) भिन्नसंश्रयः

71. एतेषु आचार्य रेवाप्रसाद द्विवेदिनः अभिनवं काव्यशास्त्रं किम् ?

(A) काव्यालङ्कारः

(B) काव्यशास्त्रप्रशस्तिः

(C) काव्यालङ्कारकारिका

(D) अलङ्कारशास्त्रभूषणम्

72. 'लोकानुकीर्तनं काव्यम्' इति काव्यस्वरूपं कुत्र वर्तते ?

(A) काव्यालङ्कारकारिकायाम्

(B) अभिराजयशोभूषणे

(C) इक्षुगन्धायाम्

(D) अभिनवकाव्यालङ्कारसूत्रे

73. 'मधुपर्णी' कीदृशं साहित्यम् ?

(A) नाटिकासङ्कलनम्

(B) प्रत्यग्रकाव्यसङ्कलनम्

(C) महाकाव्यसङ्कलनम्

(D) चम्पूकाव्यसङ्कलनम्

74. 'सतनामि गौरवम्' अस्यापरं नाम किम् ?

(A) गुरुघासिदासमहाकाव्यम्

(B) सत्यस्वरूपमहाकाव्यम्

(C) धर्मविजयमहाकाव्यम्

(D) गुरुगौरवमहाकाव्यम्

75. साकेतसौरभमहाकाव्ये सप्तम सर्गस्य किं नाम ?

(A) सहकार सर्गः

(B) अभिषेक सर्गः

(C) अवतार सर्गः

(D) वनवास सर्गः

76. स्तनयुगमश्रुस्नातमित्यादि श्लोक: कस्यौ चित्यस्योदाहरणम् ?

(A) कर्मपदौचित्यस्य

(B) कर्तृपदौचित्यस्य

(C) अपादानौचित्यस्य

(D) सम्प्रदानौचित्यस्य

77. अलङ्कारानौचित्यस्य इदमुदाहरणम्

(A) चञ्चद्भुजभ्रमितेत्यादि

(B) उद्दामोत्कलिकां विपाण्डुरित्यादि

(C) खगोत्क्षिप्तैरन्त्रैरित्यादि

(D) पुण्ये ग्रामे वने वा महती त्यादि

78. प्रबन्धार्थानौचित्यस्य उदाहरणमेतत्

(A) ऊरुमूलनखमार्गेत्यादि

(B) वागर्थाविव सम्पृक्तौ इत्यादि

(C) अस्त्युत्तरस्यामित्यादि

(D) कश्चित्कान्तेत्यादि

79. "अभिनववधूरोषास्वाद:" इत्यस्मिन् श्लोके कीदृशं वर्णनमस्ति ?

(A) ग्रीष्मकालिकम्

(B) वसन्तकालिकम्

(C) शीतकालिकम्

(D) शरत्कालिकम्

80. "हारो जलार्द्रवसन" मित्यादि पद्यं केन रचितम् ?

(A) भट्टनारायणेन

(B) भट्टकौस्तुभेन

(C) भट्टबाणेन

(D) भट्टलोल्लटेन

81. दण्डिना उक्तेषु काव्यभेदेषु चतुष्पदी किं भवति ?

(A) गद्यम्

(B) पद्यम्

(C) मिश्रम्

(D) मुक्तकम्

82. "सर्गबन्ध: महाकाव्यम्" इत्यत्र उद्देश्यपदं किम् ? विधेयपदं च किम् ?

(A) पदद्वयमपि (सर्गबन्ध: महाकाव्यम् इति च) उद्देश्यपदम् ।

(B) सर्गबन्ध: इति उद्देश्यपदम्, महाकाव्यम् इति विधेयपदम् ।

(C) महाकाव्यम् इति उद्देश्यपदम्, सर्गबन्ध इति विधेयपदम् ।

(D) पदद्वयमपि विधेयपदम् ।

83. लोकोत्तराह्लादजनक ज्ञान गोचरता अस्ति

(A) प्रतिभा

(B) रमणीयता

(C) मधुरिमा

(D) स्फुटता

84. पण्डितराजजगन्नाथमते काव्यं किम् ?
(A) चमत्कारजनकभावनाविषयार्थः
(B) चमत्कारजनकभावनाविषयार्थप्रतिपादक शब्दत्वम्
(C) शब्दार्थौ
(D) क्वापि शब्दः क्वापि अर्थः

85. "काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा" इति कस्य आचार्यस्य उक्तिः ?
(A) मम्मटस्य
(B) दण्डिनः
(C) आनन्दवर्धनस्य
(D) जगन्नाथस्य

86. सहजाहार्यसौकुमार्य मनोहरा का वक्रता ?
(A) प्रत्ययवक्रता
(B) प्रकरणवक्रता
(C) उपचारवक्रता
(D) वाक्यवक्रता

87. का वक्रता विधिनिषेधात्मकधर्मोपदेशरूपेण पर्यवस्यति ?
(A) प्रबन्धवक्रता
(B) प्रकरणवक्रता
(C) वाक्यवक्रता
(D) उपचारवक्रता

88. उत्फुल्लकुसुमकाननेन मार्गेण षट्पदा इव केन मार्गेण कवयो गताः ?
(A) मध्यमेन
(B) विचित्रेण
(C) अवरेण
(D) सुकुमारेण

89. कस्मिन् मार्गे कविभिः अलङ्कारस्य अलङ्करणान्तरं निबध्यते ?
(A) सुकुमारे
(B) आभिजात्ये
(C) विचित्रे
(D) मध्यमे

90. वर्णविन्यासवक्रता चिरन्तनैः आचार्यैः केन नाम्ना व्यवहृता ?
(A) यमक–नाम्ना
(B) अनुप्रास–नाम्ना
(C) चित्र–नाम्ना
(D) श्लेष–नाम्ना

91. काकुबलेनोपजन्यते अलङ्कारप्रकारः
(A) वक्रोक्त्यलङ्कारे
(B) यमकालङ्कारे
(C) तुल्ययोगितालङ्कारे
(D) श्लेषालङ्कारे

92. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत ।

क. एकस्यासकृदावृत्तिः    i. छेकानुप्रासः

ख. अनेकस्यसकृदावृत्तिः    ii. लाटानुप्रासः

ग. अन्वयभेदेनावृत्तिः    iii. यमकालङ्कारः

घ. अर्थभेदेनावृत्तिः    iv. वृत्यनुप्रासः

| | क | ख | ग | घ |
|---|---|---|---|---|
| (A) | iv | i | ii | iii |
| (B) | iii | iv | ii | i |
| (C) | iv | iii | i | ii |
| (D) | ii | i | iv | iii |

93. उपमानोपमेययोरभेदेनोपजन्यते

(A) श्लेषालङ्कारः

(B) रूपकालङ्कारः

(C) स्मरणालङ्कारः

(D) अधिकालङ्कारः

94. उपमालङ्कारे साधर्म्यं समुपलभ्यते

(A) उपमाने

(B) उपमेये

(C) उपमानोपमेययोः

(D) द्रष्टरि

95. सत्स्वपि कारणेषु कार्याभावोत्पत्तिरलङ्कारतामुपपद्यते

(A) विभावनालङ्कारे

(B) विशेषोक्त्यलङ्कारे

(C) विरोधालङ्कारे

(D) विषमालङ्कारे

96. काव्यस्यात्मा ध्वनिः प्रवर्तकः आचार्यः

(A) आचार्य अभिनवगुप्तः

(B) आचार्य आनन्दवर्धनः

(C) आचार्य मम्मटः

(D) आचार्य विश्वनाथः

97. बुधैः शब्दस्य किं तात्पर्यम् ?

(A) काव्यतत्त्वविद्भिः

(B) शब्दतत्त्वविद्भिः

(C) अर्थतत्त्वविद्भिः

(D) धातुतत्त्वविद्भिः

98. ध्वनि सिद्धान्तस्य प्रेरणा मूलरूपेण कुतः प्राप्यते ?

(A) अपोहवादः

(B) कालवादः

(C) स्फोटवादः

(D) ध्वनिवादः

99. नास्त्येव ध्वनि: ध्वनिविरोधीनां केषां मतं वर्तते ?

(A) अभाववादीनाम्

(B) भाक्तवादीनाम्

(C) अनिर्वचनियतावादीनाम्

(D) ध्वनिवादीनाम्

100. "ध्वनेस्तत्त्वं गिरामगोचरं सहृदय हृदय संबेद्यमेव समाख्यातवन्त:" कै: स्वीकृतम् ?

(A) भाक्त वादीभि:

(B) अभाव वादीभि:

(C) ध्वनि वादीभि:

(D) अनिर्वचनियता वादीभि:

101. "व्यङ्ग्येन रहिता ____________ सहिता तु प्रयोजने" । रिक्तस्थानं पूरयत ।

(A) रूढौ

(B) शुद्धा

(C) गौणी

(D) अभिधा

102. "तच्च गूढमगूढं वा" इत्यत्र तदिति सर्वनाम्ना कस्य परामर्श: ?

(A) शब्दस्य

(B) वाच्यस्य

(C) लक्ष्यस्य

(D) व्यङ्ग्यस्य

103. श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा

विदग्धचरितानाम् ।

उपदिशति कामिनीनां यौवनमद एव ललितानि ।।

प्रस्तुत पद्ये अगूढव्यङ्ग्यं केन पदेनाभिव्यज्यते ?

(A) यौवनमद:

(B) उपदिशति

(C) अभिज्ञा:

(D) ललितानि

104. "ज्ञानस्य विषयो ह्यन्य: फलमन्यदुदाहृतम्" इत्यत्र ज्ञानस्य फलं नैयायिकमते किम् ?

(A) बुद्धिवैशद्यम्

(B) प्रकटता

(C) संवित्ति:

(D) प्रवृत्तिर्निवृत्तिर्वा

105. अनेकार्थस्य शब्दस्य संयोगादिभि: वाचकत्वे नियन्त्रिते अवाच्यार्थप्रतीतिकृत् व्यापारो भवति

(A) लक्षणामूलव्यञ्जना

(B) अभिधामूलव्यञ्जना

(C) तात्पर्यम्

(D) लक्षणा

**106.** मेघदूतम् अस्ति

(A) महाकाव्यम्

(B) खण्डकाव्यम्

(C) कोष:

(D) व्रज्या

**107.** ''त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्' इयमुक्तिरस्ति

(A) अभिनवगुप्तस्य

(B) नाट्यदर्पणकारस्य

(C) भरतस्य

(D) धनन्जयस्य

**108.** व्यायोगविषये असदस्ति

(A) ख्यातकथावस्तु

(B) स्त्रीनिमित्तसंग्राम:

(C) पुरुषपात्राणां बाहुल्यम्

(D) कैशिकीवृत्तेरभाव:

**109.** प्रकरणे नायक: भवति

(A) धीरोदस्त:

(B) धीरोद्धत:

(C) धीरललित:

(D) धीरप्रशान्तक:

**110.** अर्थप्रकृतय: कतिसंख्याका: भवन्ति ?

(A) 3

(B) 4

(C) 5

(D) 6

**111.** उपमेयं निषिद्ध्य उपमानमारोप्यते सदृशतया

(A) आक्षेपालङ्कारे

(B) उपमालङ्कारे

(C) विभावनालङ्कारे

(D) अपह्नुत्यलङ्कारे

**112.** वक्ष्यमाणस्यार्थस्य वैशिष्ट्यमभिधातुं निषेधो विधीयते

(A) अप्रस्तुतप्रशंसालङ्कारे

(B) आक्षेपालङ्कारे

(C) असंगत्यलङ्कारे

(D) अपह्नुत्यलङ्कारे

**113.** उत्कटोपमानैक कोटिक: संशय: भवति

(A) सन्देहालङ्कारे

(B) भ्रान्तिमानलङ्कारे

(C) उत्प्रेक्षालङ्कारे

(D) विभावनालङ्कारे

114. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत।

क. रुद्रट: i. काव्यालङ्कारसारसङ्ग्रह:

ख. वामन: ii. काव्यालङ्कार:

ग. उद्भट: iii. काव्यादर्श:

घ. दण्डी iv. काव्यालङ्कारसूत्रवृत्ति:

| | क | ख | ग | घ |
|---|---|---|---|---|
| (A) | i | ii | iii | iv |
| (B) | ii | iii | iv | i |
| (C) | ii | iv | i | iii |
| (D) | i | iv | ii | iii |

115. उपमेयोपमानयोर्मध्ये व्यवहारसमारोपे भवति

(A) समासोक्त्यलङ्कार:

(B) स्मरणालङ्कार:

(C) अप्रस्तुतप्रशंसालङ्कार:

(D) अनुप्रासालङ्कार:

116. भामहानुसारेण काव्यं वैचक्षण्यं न करोति

(A) कलासु

(B) धर्मे

(C) अर्थे

(D) प्रीतौ

117. मम्मटानुसारेण काव्यस्य प्रयोजनं वर्तते

(A) आनन्द:

(B) निर्वृति:

(C) परनिर्वृति:

(D) निरतिशयनिर्वृति:

118. काव्यस्य प्रयोजनेषु प्रधानं प्रयोजनं विद्यते

(A) विगलितवेद्यान्तर: आनन्द:

(B) यश:

(C) व्यवहारज्ञानम्

(D) अर्थ:

119. कान्तासम्मितता भवति

(A) उपदेशे

(B) कान्तावचने

(C) काव्ये

(D) कान्तायाम्

120. शब्दस्य प्रधानता भवति

(A) इतिहासे

(B) वेदे

(C) काव्ये

(D) काव्येतरस्मिन्

121. स्वातन्त्र्यसम्भवमहाकाव्ये कति सर्गाः सन्ति ?

(A) 70

(B) 80

(C) 72

(D) 75

122. 'विज्ञान नौका' इति कृतेः कर्ता कः ?

(A) आचार्य रहसबिहारी द्विवेदी

(B) आचार्य बन्ध्येश्वरी प्रसाद मिश्रः

(C) आचार्य मिथिलाप्रसाद त्रिपाठी

(D) आचार्य श्रीनिवासरथः

123. 'तस्मै नमो भृगुपदाङ्कित विग्रहाय' इति कस्य कवेः मङ्गलपद्यम् ?

(A) भास्कराचार्यस्य

(B) मिथिलाप्रसाद त्रिपाठिनः

(C) रहसबिहारी द्विवेदिनः

(D) स्वामी राम भद्राचार्यस्य

124. 'नमामि सरयूमह स्फुरदमन्द धारावलीम् मुकुन्दनयनाम्बुज श्रुतमरन्द सद्विग्रहाम ।' कस्य कवेः वन्दन श्लोकः ?

(A) स्वामी रामभद्राचार्यस्य

(B) भास्कराचार्यस्य

(C) मिथिलाप्रसाद त्रिपाठिनः

(D) रहसबिहारी द्विवेदिनः

125. 'आचार्यराधावल्लभत्रिपाठिनः' काव्यसंग्रहस्य नाम किम् ?

(A) वालकी

(B) वसन्तवैभवम्

(C) संसरणम्

(D) विमलालहरी

126. 'रीतिरात्मा काव्यस्य' इति केनोक्तम् ?

(A) भामहेन

(B) दण्डिना

(C) वामनेन

(D) रूद्रटेन

127. 'वक्रोक्तिरेव काव्यजीवितम्' इति केन आचार्येणोक्तम् ?

(A) भामहेन

(B) कुन्तकेन

(C) उद्भटेन

(D) विश्वनाथेन

128. वक्रोक्तिः कीदृशी न भवति ?

(A) प्रसिद्धप्रस्थानव्यतिरेकिणी विचित्रैवाभिधा

(B) वैदग्ध्य भङ्गीभणिति स्वरूपा

(C) वक्रतावैचित्र्ययोगितयाभिधानरूपा

(D) अलौकिकपदार्थाभिधानरूपा

**129.** सर्वोऽप्य लङ्कारवर्गः कस्यां वक्रतायामन्तर्भवति ?

(A) वाक्यवक्रतायाम्

(B) प्रबन्धवक्रतायाम्

(C) प्रकरणवक्रतायाम्

(D) प्रत्ययवक्रतायाम्

**130.** ''फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः'' इत्यस्मिन् वाक्ये का वक्रता विद्यते ?

(A) पर्यायवक्रता

(B) उपचारवक्रता

(C) प्रत्ययवक्रता

(D) पदपूर्वार्द्धवक्रता

**131.** ''तत्र मुख्यो व्यापारोऽस्याभिधोच्यते'' इत्यत्र 'अस्य' इति पदेन कस्य परामर्शः ?

(A) शब्दस्य

(B) अर्थस्य

(C) अभिधामूलव्यञ्जनाव्यापारस्य

(D) लक्षणामूलव्यञ्जनाव्यापारस्य

**132.** ''स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्'' इत्यत्र 'आक्षेप' शब्दार्थः कः ?

(A) आरोपः

(B) उद्वाप

(C) उपादानम्

(D) परित्यागः

**133.** एषु उपादानलक्षणायाः उदाहरणं किम् ?

(A) गङ्गायां घोषः

(B) यष्टयः प्रविशन्ति

(C) गौरनुबन्ध्यः

(D) पीनो देवदत्तः दिवा न भुङ्क्ते

**134.** आरोप्यमाणेन विषयिणा अन्यस्मिन्नारोपविषये निगीर्णे सति का लक्षणा भवति ?

(A) उपादानलक्षणा

(B) लक्षणलक्षणा

(C) सारोपालक्षणा

(D) साध्यवसानालक्षणा

**135.** ''आयुर्घृतम्, आयुरेवेदम्'' इत्यादौ लक्षणायाः प्रयोजकं किम् ?

(A) व्याप्तिः

(B) श्रुतार्थापत्तिः

(C) सादृश्यम्

(D) कार्यकारणभावादिसम्बन्धान्तरम्

**136.** परस्परं सापेक्षैः त्रिभिः पद्यैः भवति

(A) कलापकम्

(B) कुलकम्

(C) सन्दानितकम्

(D) युग्मकम्

**137.** भामहानुसारं आख्यायिकाविषये असमीचीनमस्ति

(A) सौच्छ्वासा

(B) उदात्तार्था

(C) अन्येन नायकस्य वृत्तमाख्यायते

(D) वक्त्रापवक्त्राणां छन्दसा भाव्यर्थसूचनं भवेत्

**138.** विश्वनाथानुसारं 'देशराजचरितम्' कस्य काव्यस्य विधा अस्ति ?

(A) विरुदस्य

(B) चम्पूकाव्यस्य

(C) कथायाः

(D) आख्यायिकायाः

**139.** महाकाव्यलक्षणे असमीचीनम्

(A) इतिहासोद्भवं वृतम्

(B) अष्टाधिकाः सर्गा

(C) धर्मार्थकाममोक्षेषु एकं प्रयोजनम्

(D) शृङ्गारवीरहास्यानाम् मध्ये एकोऽङ्गी रसः

**140.** अस्मिन् सर्गाः आश्वाससंज्ञकाः सन्ति

(A) सेतुबन्धे

(B) महाभारते

(C) कर्णपराक्रमे

(D) नैषधीयचरिते

**141.** 'निर्वेदः स्थायिभावोऽस्ति, शान्तोऽपि नवमो रसः' इति कस्य आचार्यस्य कथनमस्ति ?

(A) आचार्य मम्मटस्य

(B) आनन्दवर्धनस्य

(C) अभिनवगुप्तस्य

(D) आचार्य विश्वनाथस्य

**142.** उदाहरणे रसस्य निरूपणं कार्यम्

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
तारस्वनं पृथितथूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ।।

(A) करुण रसः

(B) हास्य रसः

(C) वीर रसः

(D) शृंगार रसः

**143.** व्यभिचारी भावस्य संख्या वर्तते

(A) सप्तदश

(B) षट्षष्टिः

(C) षोडश

(D) त्रयस्त्रिंशत्

**144.** देवादिविषयका रतिरुच्यते

(A) रस:

(B) उद्दीपनम्

(C) भाव:

(D) विभाव:

**145.** रसभावयो: अनौचित्यं कथ्यते

(A) नाट्यम्

(B) रसाभास:

(C) ध्वन्यात्मकरस:

(D) व्यभिचारिभाव:

**146.** काव्यात् चतुर्वर्गं प्राप्नुवन्ति

(A) अल्पधिय:

(B) अल्पधिय: अपि

(C) अनल्पधिय: एव

(D) सुकृतिन: अल्पधिय:

**147.** काव्यात् मोक्षप्राप्तिर्भवति

(A) काव्यफलस्य अनुसंधानात्

(B) काव्यफलस्य अननुसंधानात्

(C) काव्यजन्यधर्मफलस्य अनुसंधानात्

(D) काव्यजन्यधर्मफलस्य अननुसंधानात्

**148.** काव्यात्धर्मप्राप्तौ प्रमाणं वर्तते

(A) वेदवाक्यम्

(B) प्रत्यक्षम्

(C) अनुमानम्

(D) काव्यम्

**149.** आचार्यवामनानुसारेण गुणा: भवन्ति

(A) काव्यस्य कर्तार:

(B) शोभाया: कर्तार:

(C) काव्यस्य शोभाया: कर्तार:

(D) रसोत्कर्षस्य कर्तार:

**150.** मम्मटानुसारेण वामनस्य प्रसादनामक: शब्दगुण: अन्तर्भवति

(A) माधुर्ये

(B) ओजसि

(C) प्रसादे

(D) उक्तेषु न कुत्रापि

रफ़ कार्य / ROUGH WORK

रफ़ कार्य / ROUGH WORK

रफ़ कार्य / ROUGH WORK